**शङ्खमुख** पुंस्त्री० शङ्ख इव मुखमस्य । कुम्भीरे हेमच० । स्त्रियां ङीप् । [ चका) क्षुपभेदे शब्दच० ।

**शङ्खिका** स्त्री शङ्खस्तदाकारं पुष्पमस्त्यस्याः ठन् । (चोरका-

**शङ्खिन्** पु॰शङ्ख+अस्त्यर्थे इनि । १विष्णौ, २समुद्रे च मेदि०।

**शङ्खिनी** स्त्री शङ्खस्तदाकारं पुष्पमस्त्यस्याः इनि । १चोरपुष्प्याम्, अमरः । २श्वेतपङ्गागे ३विश्वः । ४श्वेतबुह्मायां ५श्वेतचुह्मायां, ६यवतिक्तायां, राजनि० । ७स्त्रीभेदे, ८उपदेवताभेदेः, (शाकचिह्नी) ९शङ्खवल्यां स्त्रियाञ्च । स्त्रीभेदलक्षणं रतिमञ्जर्य्यामुक्तं यथा
''दीर्घा सुदीर्घनयना वरसुन्दरी या कामोपभोगरसिका गुणशीलयुक्ता । रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी सा"। "शशके पद्मिनी तुष्टा चित्रिणी रमते मृगे । वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हये" । "पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी । शङ्खिनी चारगन्धा स्यात् मदगन्धा च हस्तिनी" । [राजनि० ।

**शङ्खिनीफल** पु० शङ्खिन्या इव फलमस्य । शिरीषवृक्षे

**शङ्खिनीवास** पु० ६तत० । शाखोटकवृक्षे शब्दच० ।

**शच** गतौ भ्वा० आत्म०सक० सेट् इदित् । शञ्चते, अशञ्चिष्ट ।

**शच** वाचि भ्वा० आत्म० सक० सेट् । शचते अशचिष्ट ।

**शचि**(ची) स्त्री शच-इन् वा ङीप् । १इन्द्रपत्न्याम् अमरः । २करणान्तरे मेदि० ।

**शचीपति** पु० ६तत०। इन्द्रे अमरः । शचीभर्त्रादयोऽप्यत्र ।

**शट**(ठ) श्लाघायां चु० आ० सक० सेट् । शाट(ठ)यते अशीशट(ठ)त । [ शटति । अशाटीत् अशटीत् ।

**शट** शादे अक० रोगजनने गतौ भेदे च सक० पर० भ्वा०

**शट** पु० शटति रुजति दन्तं शट-अच् । १अम्ले सि०कौ०। २सिंहकेसरे ३जटायाञ्च स्त्री अमरः टाप् ।

**शटि(टी)** स्त्री शट-इन् वा ङीप् । (वन आदा) ख्यातनामख्याते ओषधिभेदे
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका । गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका । भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः । तिक्ता तीक्ष्णा च कटुकाऽनुष्णास्यमलनाशिनी । शोथकासव्रणश्वासशूलाध्मान ग्रहापहा" भावप्र० ।

**शट्टक** न० शट-क्विप् टक-अच् कर्मधा० । घृतलवमिश्रितशालिचूर्णे । ''शालिचूर्णं घृतं तोयं मिश्रितं शट्टकं वदेत्" भावप्र० ।

**शठ** वधे सक० कैतवे क्लेशे च अक० भ्वा० पर० सेट् । शठति अशाठीत् अशठीत् ।

**शठ** आलस्ये चु०पर०अक०सेट् । शाठयति ते अशीशठत् त ।

**शठ** दुष्टवचने अद०चु०उभ०सक०सेट् । शठयति ते अशशठत् त

**शठ** न० शठ-अच् । १तगरे २कुङ्कुमे ३लौहे च र०जनि०। ४धुस्तूरे ५मध्यस्थपुरुषे च पु० । "प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् । व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः" विष्णुपु० उक्ते ६धूर्त्ते त्रि० मेदि० ७नायकभेदे पु० तल्लक्षणं यथा
"शठोऽयमेकत्र बद्धभावो यः । दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति" सा० द० ।

**शठता** स्त्री शठस्य भावः तल् । शाठ्ये वञ्चनायाञ्च । [राजनि०

**शठम्बा** स्त्री शठ-अच् अबि-अच् कर्म० शक०। अम्बष्ठायाम्

**शड** संघाते रोगे च अक० भ्वा० पर० सेट् इदित् । शण्डति अशण्डिष्ट । [शशाण्डे शेषतः ।

**शण** दाने भ्वा० पर०सक० सेट् । शणति अशाणीत् अशणीत्

**शण** पु० शण-अच् । ख्यातनाम्ख्याते क्षुपभेदे हेमच० ।

**शणघण्टिका** स्त्री शणः घण्टेव तत्तुल्यरवफलकत्वात् इवार्थे कन् । घण्टारवतुल्यफलायाम् शणपुष्प्यां राजनि० ।

**शणपर्णी** स्त्री शणस्येव पर्णान्यस्याः ङीप् । असनपर्ण्याम् राजनि० । [शणो स्वार्थे क । तत्रैव ।

**शणपुष्पी** स्त्री शणस्येव पुष्पमस्याः ङीप् । (झनझने) वन-

**शणसूत्र** न० शणाज्जातं सूत्रम् । शणजाते जाले अमरः ।

**शणालुक** पु०शण इवालुकः । आरेवतवृक्षे (शोणालु) शब्दर०

**शणिका** स्त्री शणवत्पुष्पमस्त्यस्याः ठन् । शणपुष्प्यां राजनि०

**शण्ड** न० शडि-अच् । १पद्मादिसमूहे शब्दर० । २नपुंसके ३वृषे च द्विरूपको० । [तस्यापत्यं गर्गा० यञ् शाण्डिल्य ।

**शण्डिल** पु० शडि-इलच् । शाण्डिल्यस्य पितरि मुनिभेदे

**शण्ढ** न० शण-ढ तस्य नेत्त्वम् । १अन्तःपुररक्षके कृत्रिमक्लीबे २क्लीवमात्रे भरतः । ३वृषे मेदि० ४बन्ध्यपुरुषे जटा० ५उन्मत्ते धनञ्जयः ।

**शत** न० एक०व० शो-डतच् । १ख्यातनाम्ख्यातसंख्यायाम् २बहुसंख्यायां ३तत्संख्याते च । स्वार्थे क । तत्रैव न० शतवाचकशब्दाश्च धार्त्तराष्ट्रः१ शतभिषा तारा२ पुरुषायुषम्३ रावणाङ्गुलिः४ पद्मदलं५ इन्द्रयज्ञः६ अक्षियोजनम्७"कविकल्पलता । [अवयवे कन् । २शतसंख्यायां न०।

**शतक** त्रि० शतं परिमाणमस्य कन् । १शतसंख्यायुक्ते ।

**शतकुम्भ** पु० शतं कुम्भा यत्र । स्वर्णखनिपर्वतभेदे भरतः ।